ॐ

श्री कृष्णः शरणम् मम ॥

रुक्मिणी-परिणयम् काव्यम्



लेखक :-

स्व. पं. गुणराज उपाध्याय रामदास

रुक्मिणी-परिणयम्
काव्यम्

लेखकः-
स्व. पं. गुणराज उपाध्याय रामदास

प्रकासिकाः-
श्रीमती शेष कुमारी

(सर्वाधिकार सुरक्षित)

मूल्यः— १।७५

दुइ शब्द

हाम्रा पुज्यनिय पिताजी स्वर्गीय श्री पं० गुणराज उपाध्यायले शुरूमा १९९६।९७ साल तिर संस्कृतमा महाकाव्य लेखन शुरु गर्नु भएको थियो। सो अनुसार संस्कृतमा दुई तीन काव्य लेख्नु भयो। अहिले प्रस्तुत गरिएको "रुक्मिणी परिणयम्" नामक काव्य पनि उसै वखत रचिएको हो। यसरी संस्कृतमा रचिएका काव्यहरू विद्वत समाज बाहेक आफु जस्तै अरुहरूको लागि कागलाई वेल पाके जस्तो मात्र हुन जाला भन्ने कुराहृदयं गम गरी सरल नेपाली भाषामै काव्य रचना गराउने हाम्रो पुज्य माताजीको प्रेरणा स्वरूप पिताजीले पछि 'श्री भरत–मिलन महाकाव्य' 'श्री कृष्ण शन्देश महाकाव्य' जस्ता महाकाव्यहरू रचनु भई नेपाली पाठकवृन्दमा छोडी दिनु भएको हो। आफूलाई रामको पाउको अनन्य दासको रूपमा अर्पण गरी सारा संसार नै उही प्रभुराम कै स्वरुप हो भन्ने कुरा प्रख्यात गर्नु हुने महाकाव्यकार कविवर स्वर्गीय श्री गुणराजज्यूले रचनु भएको 'श्री भरत मिलन महाकाव्य' कति सरल र सार्थक छ भन्ने कुरा सांवा अक्षर सम्म जान्ने पाठकलाई पनि महशुस हुने नै छ।

हाल प्रस्तुत 'रूक्मिणी परिणयम्' लाई विद्वान वर्गले सहर्ष स्वीकार गरि दिनु हुने छ भन्ने पूर्ण आशा लिएका छौं। प्रस्तुत 'रुक्मिणी परिणमय' केवल दुई सर्ग सम्म रचना गर्नु भई त्यस पछिका काव्य कृतिहरु नेपाली भाषा मै रचना भए। आफूले संस्कृत न जानेको कारण र अरुलाई प्रुफ रिडिङ्ग गराउदा पनि हडवडीले गर्दा प्रस्तुत कृतिमा धेरै गल्ती छापिनु अवस्यंभावी छ। यसमा पाठक वृन्दबाट हार्दिक क्षमा याचना मागेको छु।

–माधव राज खनाल



शरणं मम नन्द नन्दन
शरणं मे वृष भानु नन्दिनी
शरणं ममता वुभौ पुनः
शरणं ता वपहाय कं श्रये ।।

स्व० पं० मुरारज उपाध्याय रामदास

ॐ

श्रीकृष्णः शरणम् मम

रुक्मिणी—परिणयम्

काव्यम्

तदस्ति भूमे र्महनियखण्ड मखडण्सच्चित्सुख सद्म रम्यम् ॥
आखण्डला धिष्ठित मण्डलस्य विखण्डयन्मानमदं व्युदस्य ॥

१

गुर्गिरा मस्ति जराति जीर्णो
शेते गिरौ गीर्ण विषो गिरीशः ॥
इतीव निश्चित्य गताऽवलम्बा
देवी गिरां यत्र हि साऽवलम्बा ॥

२

निरुद्यमः कल्पलतो पजीवी
सदाऽप्सरोभि र्हृतवीर्य सारः ॥
निरीक्ष्य यत्रत्यजनान् सुरौ घो
बभार मन्ये मनसाऽपि दैन्यम् ॥

३

विमानिनः सन्तु सुधा शनाः किं
विलोचनाऽ गोचरतां गतै स्तैः ॥
इतीव यत्सौ धविमान भाजां
पुराऽङ्गनानां ववृधेऽ भिमानः ॥

४

अभ्रंलिहाऽग्रा श्च महेन्द्रनीलो-
पलोपसृष्टाः किल यत्र सौधाः ।।
निरोद्धु मादित्यपथं प्रवृद्ध-
कूटाग्रवद् विन्ध्यगिरे विरेजुः ।।

५

सुकारुभिश्चारु विनिर्मितानां प्रभाभिरच्छस्फटिकाऽऽलयानाम्।।
बभु र्हसन्तः किल यत्र मार्गाः कैलास शुभ्रा मलका मिवोच्चैः ।।

६

यत्राऽखिलोच्चाऽवच वस्तु पूर्णाः
समृद्धशोभाः खलु पण्य वीथ्यः ।।
मनः समागन्तुजनस्य सद्य-
श्चिराय चित्रोत्तरलं वितेनुः ।।

७

दिदृक्षया दिग्भ्य उपागतानां
प्रणादसब्दै रभितो जनानाम् ।।
तरङ्ग सङ्घाऽऽहित धीर घोषं
महार्णवं यत्स्थल मुज्जिगाय ।।

८

मुहुः क्वणच्चञ्चल किङ्किणीनां
कोलाहलैश्चाऽविरतं रथानाम् ।।
उत्प्रेक्ष्यते व-श्रम लोल काञ्ची-
शिञ्जाऽऽरवा यत्र पुरः पुरश्रीः ।।

९

गता ऽऽ गतै रश्वरथद्विपाना-
मजस्रनिर्यप्तदिक ब्रजैश्च ।।
पन्थाः समन्ता दपि यत्र पूर्णो
विशङ्कटो ऽप्येति ससंङ्कटत्वम् ।।

१०

नित्याऽऽस्थितेनाऽपि जनेन भूयो-
नु भूयमानं नव। मन्वहं यत् ।।
इयत्तया वक्तु मभूदशक्यं
हरे रिवा ऽत्यद्भुत विश्वरूपम् ।।

११

मुदां निधानं वसतिः शुभानां
विलास भूमि श्च पयोब्धिजायाः ।।
उरो मुरारे रिव यादवानां
बभार शोभा मुपवर्तनं तत् ।।

१२

गरीयसी भूतल सार भूता
सा द्वारकाऽऽख्या नगरी विरेजे ।।
दिगन्तसान्द्री कृत विक्रमाणां
या राज धानी यदु पुङ्गवानाम् ।।

१३

पुरी मुपेत्य त्रिदिवो पमां या-
मचिन्त्य लीलावि भवो मुरारिः ।।
भरं जिहीर्षुर्भुव आत्म तन्त्रः
प्रभु र्विजह्रे मनुजाऽवतारः ।।

१४

साक्षा दमर्त्यै रनुवर्त्तनीय-
मासाद्य तं कारण मर्त्य लिङ्गम् ।।
अनन्य सौभाग्य पदाऽधिरूढा
श्रिया ननर्तेव चिरं पुरी सा ।।

१५

जगत्त्रयैका ऽद्भुत शिल्पिनं तं
मनुष्यरूपं पुरतो दिदृक्षुः ।।
अनाऽऽद्रिताऽखण्ड सामाधि सौख्य-
स्तत्रैकदा प्रादुरभूत् सुरर्षिः ।।

१६

प्रतप्तचामीकर चारु कान्तिः
काषायवासा विपुलास एषः ।।
ज्वलन्महोभिर्विमलो पवीती
तेजः स्वयं ब्राह्म मिवाऽवभासे ।।

१७

पिशङ्ग भाभिः सतता ऽनुबद्ध-
जटाभिरुद्भात विशाल भालः ।।
हृषीकवर्गो विषयेषु मा गा-
दित्यङ्गुलीभिः कलिता ऽक्षमालः ।।

१८

मृदुस्वना मङ्गुलि भङ्गिभिःस्वा-
मंसोपगूढां क्वणयन् विपञ्चीम् ।।
गायँश्च कर्मा द्भुत मच्युतस्य
द्रुताऽन्तरो भक्ति रिवाऽऽत्तमूर्तिः ।।

१९

अथान्तरिक्षा च्छनकै रकस्मा-
त्विलोक्य चा धोऽवतरन्त मेनम् ।।
स-सम्भ्रमं कोऽय मिति ब्रुवन्तो
जनाः समन्ता च्चकिता विचेरुः ।।

२०

विकस्वरैः सर्वत उल्लसद्भि-
र्महो भि राक्रान्त नभोऽवकाशः ।।
दिदृक्षया किस्वि दयं मुरारे-
रुपैति भास्वा निति तै रतर्कि ।।

२१

तेजो हि दुष्प्रेक्ष्य मशीत रश्मे-
र्महो स्त्वदो लोचन रञ्जन च्च ।।
ततो न चाऽयं प्रति भाति भानु-
र्न वा कलङ्को त्कलितः शशाङ्क ।।

२२

अग्नि : स्वयं वाऽवतरन् न भस्तो
महामहा दीव्यति विष्वगेष : ।।
भवेदुता ऽन्यः खलु लोकपालः
प्राप्तो ऽ धुनाऽधोक्षज दर्शनार्थी ।।

२३

धृतोपवीतः किमसौ विरिञ्चि-
र्जटाकलापोल्लसितः शिवोऽनु ।।
धर्मो भवेद् वा कपिलांशुकोऽय -
मित्थं मिथःपौरजना जजल्पु ।।

२४

प्रासाद मासाद्य पुरो मुरारेः
सुरेन्द्र सद्माऽभ्यधिकोज्ज्वलश्रि ।।
विहायसःसोऽवततार पश्चा-
दबाधित स्वैरगतिः सुर्षिः ।।

२५

स्वयम्भुवः सम्भव मग्रतस्त-
मतर्कितोपस्थित माकलय्य ।।
सद्यो विमुच्या ऽऽ सन मातिथेयो
ब्रह्मण्यदेवो हरि रुच्चचाल ।।

२६

निपीड्य पादौ भगवान् स भक्त्या
कृत्वा सपर्यां विधिव च्च तस्य ।।
प्रीतः पुनः सस्मित मर्पितार्घ :
कृताञ्जलिः स्वागत मब्रवी च्च ।।

२७

मञ्चो परिष्टा दथ चोपविष्टं
मुहुश्चलच्चामर चारूपाणि : ।।
श्रमाऽपनुद्भि श्च मरूद्भि रेनं
स्वयं स देव: समवीजय च्च ।।

२८

सुखोपविष्टस्य च तस्य पश्चा-
ल्लब्ध्वाऽभ्यनुज्ञां मुनिसत्तमस्य
स्फुरन्महा रत्न मनोहरं स्वं
शिश्रायसिंहा सनमच्युतोऽपी ।।

२९

इन्दीवरश्यामल कोमलाङ्गो
हरि स्तदानीं कनकासनस्थः ।।
जगद्गुरु : स : शुशुभेऽतिमात्रं
सुमेरुकूटे ष्विव यामुनौघः

३०

हस्तौ समानीय स माननीय–
मानन्दय न्नप्यथ तं मुनीन्द्रम् ।।
सान्द्रप्रमोदस्तिमितं स्मितास्यो
वक्तुंशनै : प्रारभताऽजनाभः ।।

३१

धन्योऽसिमान्योऽखिलदेह भाजां
मूर्त स्तपोराशि रि वाऽऽवि भातः ।।
अतीन्द्रियानन्द रसाब्धि मग्न
कोऽन्यो जगत् पावयितुं प्रवृत्तः ।।

३२

एनो जनाना मपहर्तु मन्यै
रसक्य मन्तः करणस्थितं यत् ।।
ग्रसन् समग्रं तदितस्तत स्त्वं
भ्रमस्य हो ! दुर्लभ दर्शनोऽसि ।।

३३

यत्सम्मुखं प्राप्य मनो जनस्य
जहाति सद्यो विषयाऽभिलाषम् ।।
न तस्य ते किञ्चि दपेक्षितं स्या–
त्प्राप्तोऽसि भाग्यै रधुना पुरस्तात् ।।

३४

रात्रिः किलाऽद्यैव हि सुप्रभाता
दिनं तथा दः स्मरणीय मेव ।।
अहो ! महानन्दमयः क्षणोऽयं
य न्नेत्रयो रुत्सवतां गतस्त्वम् ।।

३५

मनुष्य भावोऽप्यधुना ममाऽयं
बि भर्ति साफल्य मुपेत्य कायम् ।।
यद् वेधसः सम्भव मत्र साक्षा-
त्पश्याम्यकस्मात् पुरतो भवन्तम् ।।

३६

जन स्तत स्तेऽभ्यनुकम्पितोऽयं
प्रमोद माद्यद्धृदयो विलज्जः ।।
त्यक्तेषणं त्वा मपि वीत शङ्कः
करोमि किं चे त्यनुयुङक्त एव ।।

३७

स्मिताननाब्जे भगवत्यथैवं
व्याहृत्य पश्चाद् विरते सुर्षिः ।।
प्रत्यब्रवी दुत्पुलको ऽतिहर्षा-
द्वचो भि राविष्कृत गद्गदं सः ।।

३८

स्थाने तदेतत् भगवन् ! वच स्ते
नराऽनुरूपं परमस्य पुंसः ।।
ब्रह्मण्य देवत्व मसंशयं स्वं
वचश्छलादेव मपावृणोषि ।।

३९

निरञ्जनं निर्गुण मद्वितीय
मगोचरं वाङ्मनसोरनादि ।।
ज्योतिः परं सच्चिदुपाह्वयं यत्-
तदेव साक्षाद्विदित स्त्वमात्मा ।।

४०

स्वसत्तया व्याप्य जगत्समग्रं
स्थितो ऽ सि भूमन्! स्वय मप्रपञ्चः
आस्थाय नित्यां प्रकृतिं पुनः स्वां
मायामयः प्राकृतवद्विभा सि ।।

४१

जगन्निदानं त्रिगुणाऽऽत्मकं त-
त्प्रधान मस्त्येव जडं स्वभावात् ।।
जडा त्कुतः सृष्टिरियं ततः स्या-
दहो ! परात्मँ ! स्त्वमसङ्ग एव ।।

४२

बिभर्षि विश्वं निखिलं स्वशक्त्या
जगन्निवासत्व मुपेत्य भूयः ।।
त्वय्यस्तदोषे न च विश्व मेत-
त्तस्त्वयं महाश्चर्यमयो ऽ स्य घोशः ।।

४३

अन्तः प्रविश्या ऽ खिलदेह भाजां
प्रवर्तयँ ल्लोक मिमँ स्त्व मात्मा
तथा प्युदासीनतया ऽ सि साक्षी
को वा गुणां स्ते गणयेत् प्रगल्भः

४४

निरन्तरा ऽभ्यस्तसमाधियोगा-
न्महात्मभिः स्वात्मनि भावनीयः
स वेदवेद्यः पुरुषोत्तम स्त्वं
धियैकगम्यः पुरतो ममा ऽसि ।।

४५

स्रष्टा त्रयाणां जगतां स वेधा
यत्पाद पङ्केरुह वीक्षणोत्कः ।।
स एव साक्षात् धृतविग्रह स्त्वं
विभासि किं भाग्य मतः परं स्यात् ।।

४६

कर्मण्युदाराण्यनवद्यकीर्ते-
र्गायँ स्तवोच्चै रुपवोणयं श्च ।।
भमन्नतृप्तो जन एष भाग्या-
दुपस्थितः सम्प्रति सम्मुखं ते ।।

४७

सत्यं प्रभो ऽयं विदितो ऽर्थलिप्सु-
र्जनो ऽन्तिकं ते विधिना ऽभ्युपेतः ।।
को वा पुनः कामवरप्रदातु-
स्त्वत्तो ऽभिलाषं न लभेत जन्तुः ।।

४८

तदेतदुद्य ज्जलदा ऽभिरामं
कन्दर्पदर्पोन्मथनं वपु स्ते ।।
ध्येयं मनस्यस्तरजःप्रपञ्चै:
सदा मदन्तःकरणे विभातु ।।

४९

गुणाँ स्त्वदीयानुपवीण यन्तौ
स्यातां प्रवीणा वनिशं करौ मे ।।
भवद्विलासाऽमृतपानमत्ता
जिह्वानटी नृत्यतु निर्भर च्च ।।

५०

एतावदद्यावधि सम्भृतं मे
समीहितं साधयितुं त्वमर्हः ।।
यतो भवत्पादसरोज भाजा
मभीप्सितं स्यात् विफलं न जातु ।।

५१

व्याहारैः प्रमदमदस्खलद्भि रित्थं
रोमाञ्चोत्कलितवपुःस्तुवन् सुरर्षिः ।।
पश्यँ स्तद् स्मितसुषमं मुख च्च शौरे
र्नाऽ तृप्यत् स्तिमितविलोचनश्चिरं सः ।।

५२

ॐ तत्सत् श्री कृष्णार्पणमस्तु

इति प्रथमः सर्गः

ॐ

श्रीकृष्णः शरणम् मम ॥

द्वितीयः सर्गः

अथ वीक्ष्य जडीकृतं मुदा
मुनिवर्यं पुरत स्तमच्युतः ।।
स्मयमानमुखाम्बुजः शनै-
र वदद्वारिद धीर निःस्वनः ।।

१

परिपावयतो जगत्त्रयं
विदिताऽनेककुतूहलस्य ते ।।
अवितर्कितसंगमा न्मुने !
स्थिरता मेत्य मनः प्रसीदति ।।

२

त्रिदिवा दुत सत्यविष्टपा-
दथवा ऽधो भुवनात्तथा ऽन्यतः ।।
अधुनेह कुतो ऽ स्युपेयिवा-
न्गति रव्याहतशक्ति रे व ते ।।

३

अथ को ऽ पि च कौतुकप्रदः
समुदन्तो नव उत्थितः क्वचित् ।।
तमशेष मशेषवृत्तवि-
द्वदतामुत्तम ! वक्तुमर्हसि ।।

४

इति चैत दुदीर्य सस्मितं
विरते तत्र नरच्छले हरौ ।।
त्वरितो ऽ ति मुदा कृताञ्जलिः
प्रणमन्नेव मुवाच नारदः ।।

५

भुवनत्रयशिल्पिनो ऽ धुना
पुरतो ऽ भ्येत्य परात्परस्य ते ।।
कतरद् पुन रन्य दस्ति त–
त्कथनीयं कुतुकाऽऽवहं मम ।।

६

यदचिन्त्य मगोचरं गिरां
त्रिजगद्बीज मसङ्गसंज्ञितम् ।।
तदिहा ऽऽ श्रितविग्रहो ऽ सि भोः ।
किमतः कौतुक मुच्यतां ? प्रभो ! ।।

७

सचराऽचरविश्व मात्मना
समभिव्याप्य बहि स्तथा ऽ न्तरम् ।।
परिपूर्णतयाः स्थितस्य ते
ऽ विदितं किं स्विदहो! चिदात्मनः ।।

८

त्वमतीत मथो भव त्तथा
भगवन् ! भावि च वेत्सि शाश्वतः ।।
अथ साक्षितया ऽ विकारवान्
भ्रमतः स्वप्नसुषुप्तिजागरान् ।।

९

हृदये ऽखिलदेहिनां स्वयं
समधिष्ठाय पुन स्त्व मीश्वरः ।।
स्ववशा नथ नर्तयँ श्चता-
न्परमात्मन् ! वितनोषि ना ऽद्भुतम ।।

१०

नरलिङ्गनिगूढवैभवो
भगवन् ! प्राकृतवत्त्वमास्थितः ।।
जन मेत महो विडम्बयन्
कुतुकं श्रोतु मपेक्षसे कियद् ।।

११

विविधै रिह चेष्टितैःप्रभो !
परिपातुं जगदुद्यतस्य ते ।।
अथ पुज्यत एव वा ऽप्यसा
वनुयोगः खलु कौतुकावहः ।।

१२

प्रसभं मुखरीकृतो ऽथवा
भवताऽन्तर्हृदयाधिवर्तिना
किमपि स्फुटवागम ञ्जनः
कुतुकं वर्णयितुं समीहते

१३

प्रणमन् मुहु रुद्यताञ्जलि-
र्वचनं चेत्यभिधाय नारदः ।।
मुदित स्तदनन्तरं शनैः
पुन राख्यातु मदः प्रचक्रमे ।।

१४

विषयः स विदर्भसंज्ञितो
जयति क्ष्मातलमण्डनायितः ।।
बलवान् किल यत्र विश्रुतो ।
नृपति र्भीष्मक इन्द्रसन्निभः ।।

१५

दहिता ऽस्य हि भूभृतो ऽस्ति सा
विदिता श्री रिवरूपिणी स्वयम् ।।
भुवनत्रयसृष्टिदक्षिणो
विधि रात्मन्यमुयैव स-क्षणः ।।

१६

अधुना ऽभिनवस्य सा शनै-
र्वयसः सन्धिदशा मुपेयुषी ।।
त्रपयो त्तरलं स्व माकुला
ननु मुग्धा व्यवधातु मिच्छति ।।

१७

पृथुपीवरमांसलोल्लस-
त्स्वनितम्बद्वयविम्बमन्थरा
कठिनोरुविसारिमण्डल-
स्तनभारानमिता कृशोदरी ।।

१८

स्मितसुन्दरकुन्दकुड्मलो-
ज्ज्वलदन्तावलिमण्डितानना ।।
नवचन्द्रमुखी मृदुस्वना
दल दिन्दीवर बन्धुरेक्षणा ।।

१९

स्फुरदुज्ज्वलरुक्मरोचिषा
वपुषैवा ऽभिहितेह रूक्मिणी ।।
अथ चा ऽनुपमा विभाति सा
रमणीरत्न मनन्यसुन्दरी ।।

२०

दुहितुःस निरीक्ष्य भूपति–
स्तदमुष्याः स्मर मेदुरं वयः ।।
अनुरूपवराऽनुचिन्तया
न च निन्द्रामपि सम्य गृच्छति ।।

२१

जगदद्भुतरूपसंपदो
वरमस्या अधिगत्य न क्वचित् ।।
स ततः पुरुषोत्तमाय ते
तनया मर्पयितुं समीहते ।।

२२

तनयः खलु तस्य भूपते
स च रुक्मो खलपक्षसंश्रितः ।।
भवता सह वाञ्छितं कुधीः
स्वलु रुद्वाहविधिं न मन्यते ।।

२३

अवमत्य भवन्त मुद्धतो
मदमत्तो निजवीर्यगर्वितः ।।
अनुजा मथ चेदि भूभृते
शिशुपालाय स दातु मिच्छति ।।

२४

प्रवयाः स विदर्भ भूपति–
बंलिनैवं विवशीकृतोऽ मुना ।।
विनिवारयितुं तमक्षम–
स्तदनिच्छन्नपि चा ऽनुमन्यते ।।

२५

इति लब्धबलः खलाग्रणी–
रथ चैद्याय स मागधाश्रितः ।।
परिणेतु मुपेहि रुक्मिणी
मिति सन्देशहरं सिसृक्षति ।।

२६

अथ सत्वर दूत भाषिता
दिति वृतान्त मवेत्य हर्षितः ।।
कृतमाङ्गलिकक्रमो मुदा
स विदर्भा नचिरा दुपेष्यति ।।

२७

मगधेश्वरपक्षवर्तिनो
नरपाला भवतो ऽपकारिणः
भवदागमशङ्कचेतसो–
ऽनुगमिष्यन्ति तमेव सर्वशः ।।

२८

इति सज्जबलै रितस्ततो–
ऽप्यभिगुप्तो ऽखिलपार्थिवै रयम् ।।
सहसैव हि रुक्मिणीं हठा–
दथ चोद्वोढु मलं भविष्यति ।।

२९

त्रपया ऽ तितरां निरुद्धवा-
गथ शालीनतया च संयता ।।
न च शक्ष्यति कर्तु मन्यथा
हृच नुरक्ता त्वयि चा ऽ पि रूक्मिणी ।।

३०

भवत: परिपन्थिना मिदं
मनसा ऽऽ लोच्य चिकीर्षितं विधि:
त्वरित: स भवंन्त मत्र मा-
मिति विज्ञापयितुं समादिशत् ।।

३१

स समीक्ष्य च कार्य गौर
यदवोचत् पुन रग्रतो मम ।।
भगवान् ! विनिवेदयामि त-
द्विधिसंदिष्ट मशेषतो ऽ धुना ।।

३२

पुरतो मधुराक्षरं हरे-
रथ चैतावदुदीर्य नारद: ।।
पुन रारभते स्म भाषितुं
वचनं त त्परमेष्ठिन: स्मरन् ।।

३३

विहर नरलीलया भवा-
नवतीर्ण: स्वयमेव सम्प्रति ।।
मम चापल मोशमानिन:
परिमार्ष्टुं कृपयैत दर्हति ।।

३४

विदिता ऽ खिलचेष्टिताय ते
वचसैत द्विनिवेदनं पुनः ।।
ननु सेवकवृत्तिरे व मे
न तु सर्वज्ञमदाऽवलिप्तता ।।

३५

जगतो ऽ प्यखिलस्य लीलया
प्रलयोत्पत्तिपटीयसि त्वयि ।।
भगवन् ! निदमित्थ मित्यदो
ननु हास्यास्पद मेव मद्वच ।।

३६

तदपि त्रिगुणात्मके प्रभो !
जगति भ्रान्तमना अहन्त्व भाक् ।।
अह मस्थिर एष शङ्कया
प्रलप न्नप्यवितव्य एव ते

३७

नरभाव मुपेत्य लीलया
कृपयो र्वी मनुगृहाणत स्तव ।।
चरणाम्बुजसेवनाय सा
ऽ प्यवतीर्ण वसुधातले रमा ।।

३८

समुपेत्य विदर्भ भूपते–
स्तनयात्वं भुवि भीष्मकस्य सा ।।
निखिलै रुपचीयते गुणै–
रिह नाम्ना विदिता च रूक्मिणी ।।

३९

त्रपया ऽ तितरां निरुद्धवा–
गथ शालीनतया च संयता ।।
न च शक्ष्यति कर्तु मन्यथा
हृच नुरक्ता त्वयि चा ऽ पि रूक्मिणी ।।

३०

भवतः परिपन्थिना मिदं
मनसा ऽऽ लोच्य चिकीर्षितं विधिः
त्वरितः स भवन्त मत्र मा–
मिति विज्ञापयितुं समादिशत् ।।

३१

स समीक्ष्य च कार्य गौर
यदवोचत् पुन रग्रतो मम ।।
भगवान् ! विनिवेदयामि त–
द्विधिसंदिष्ट मशेषतो ऽ धुना ।।

३२

पुरतो मधुराक्षरं हरे–
रथ चैतावदुदीर्य नारदः ।।
पुन रारभते स्म भाषितुं
वचनं त त्परमेष्ठिनः स्मरन् ।।

३३

विहर नरलीलया भवा–
नवतीर्णः स्वयमेव सम्प्रति ।।
मम चापल मोशमानिनः
परिमार्ष्टुं कृपयैत दर्हति ।।

३४

विदिता ऽ खिलचेष्टिताय ते
वचसैत द्विनिवेदनं पुनः ।।
ननु सेवकवृत्तिरे व मे
न तु सर्वज्ञमदाऽवलिप्तता ।।

३५

जगतो ऽ प्यखिलस्य लीलया
प्रलयोत्पत्तिपटीयसि त्वयि ।।
भगवन् ! निदमित्थ मित्यदो
ननु हास्यास्पद मेव मद्वच ।।

३६

तदपि त्रिगुणात्मके प्रभो !
जगति भ्रान्तमना अहन्त्व भाक् ।।
अह मस्थिर एष शङ्कया
प्रलप न्नप्यवितव्य एव ते

३७

नरभाव मुपेत्य लीलया
कृपयो र्वी मनुगृहाणत स्तव ।।
चरणाम्बुजसेवनाय सा
ऽ प्यवतीर्ण वसुधातले रमा ।।

३८

समुपेत्य विदर्भ भूपते–
स्तनयात्वं भुवि भीष्मकस्य सा ।।
निखिलै रुपचीयते गुणै–
रिह नाम्ना विदिता च रूक्मिणी ।।

३९

समिता वभिभूय दुर्मदा–
ञ्शिशुपालप्रमुखा न्मही भृतः ।।
अचिरा दत एव तां प्रभो।
परीणेतुं भगवँ स्त्व मर्हसि ।।

४०

विहिते भवते ति सत्वरं
भविता नः परिपूर्ण मीप्सितम् ।।
अमुनो पधिनै व दुर्भरं
भर मूर्व्याः शम मेष्यति स्वयम् ।।

४१

अथ शश्व दमर्षपूरिताः
शिशुपालप्रियकारिणो नृपाः ।।
भवदुद्धतविक्रमाऽनले
गमितारः शलभायिताः क्षयम् ।।

४२

गजवाजिरथौघसंकुलं
तदमीषां बल मर्णवोपमम् ।।
भुजमन्दरलीलयैव ते
मथितं निर्मदता मुपेष्यति ।।

४३

सहसा तदनेकभूभृतां
मिलितानीकसमुद्रमन्थनात् ।।
अथ लप्स्यसि देव ! रूक्मिणीं
भुवि भूयः कमलांश रूपिणीम् ।।

४४

अवना ववतीर्णया ऽ नया
विहर ञ्शश्वदतः समं श्रिया ।।
भगवन् ! नरलीलया ऽ खिलं
स्मयमानं जय रञ्जय ञ्जगत् ।।

४५

भगव ! न्निति वेधसो मया
त्वयि सन्दिष्ट मिदं निवेदितम् ।।
अधुना तद भीप्सितं विधे–
रचिरात्साधयितुं त्व मर्हसि ।।

४६

शिशुपालबलं विलोड्य त–
द्धरतो ऽ भ्येत्य विदर्भनन्दिनीम् ।।
तव विक्रमित श्च तत् प्रभो !
समरे चा ऽ स्मि पुन निरीक्षिता ।।

४७

अतिमर्त्य मचिन्त्य मद्भुतं
विहृतं तन्नव मन्वहं तव ।।
भुवि चा ऽ प्यवलोकय न्प्रभो !
कृतकृत्यो भविता ऽ स्म्यहं पुनः ।।

४८

पूर्वं ब्रजे च समरे स्वमरै रजेया–
न्कसा ऽ नुगा नधबकप्रमुखा न्निहत्य ।।
निर्वास्य नाग मपि कालिय मुग्ररोषं
वर्षत्रवग्दिरि महो ! स्वकरे न्यधासीः ।।

४९

–हीतेन चोज्झितमदेन ततो मघोना
गोष्ठे गवा मिह महेन्द्र पदे ऽभिषिक्तः ।।
मायाविनं किल विमोहय विधि स्वशक्त्या
त्वं वत्सवत्सपतया स्वय मावि रासीः ।

५०

त्यक्ताऽभिमान मनुगृह्य पुन विरिञ्चि
बिभ्रत्करेण कवलं धृतवेत्रवेणुः ।।
आरादुदञ्चितशिखा दथ दाववन्हेः
पादाऽऽनताऽभयद ! गोपगणा न गौप्सिः

५१

सग्वी लसन्मकरकुण्डलमण्डितांसो
लीलाऽवलोकचटुलाऽलसलोल दृष्टिः ।।
स्मेराऽऽननोऽधरविभूषित वंश यष्टि–
र्गोपाङ्गनाभिरसकृद् विपिनेष्वरंसीः ।।

५२

पीयूषसारसरसै श्चरितै रथ स्वै–
राप्लाव्य नित्यमुदितं व्रजमण्डलं तद् ।।
नाशाय कंसमुखदुर्दमदुर्नृपाणा–
मक्रूरचोदितरथो मथुरा मयासीः ।।

५३

नेत्रोत्सवं पुरि विधाय पुराङ्गनाना–
मुद्भिन्नयौवनमनोहरमञ्जुमूर्तिः ।।
हत्वा ऽधमं रजक मप्यथ कुब्जिकां ता
मन्वग्रहीः कुशलि नं किल वायक च ।।

५४

मालाकृते चरणयोः प्रणताय पश्चा-
दृत्वा यथाऽभिलषितं वर माशु भूयः ।।
तद्रक्षितं सपदि कंस भटै रकस्मा-
दाकृष्य दाहुतरसा धनु रप्य भाङ्क्षीः ।।

५५

तेनैव भग्नधनुषः शकलेन कोपा-
त्कंसाऽनुगा नभिमुखापततो निपात्य
निःशङ्क मग्रजयुतो यदुराजधान्यां
भ्राम्य न्मुहु स्तत इतो दिन मप्यनैषीः ।।

५६

नन्दादिभिः सम मथ व्रजगोपवृध्दै-
रेकां पुरोपवन एव निशा मुषित्वा ।।
तं वै सहस्रगजशक्तिभृतं गजेन्द्र-
मम्बष्ठनुन्न ममुनैव सहा ऽ वधी श्च ।।

५७

शुभ्रं यशः स्व मिव दन्त ममुष्य बिभ्र-
द्वीरोचितं तदसृजोपचित श्च वासः ।।
चञ्चच्छमाम्बुकणमण्डितवक्त्रबिम्बो
द्वार्यङ्ग रङ्ग भवनस्य हठा दवैक्षीः ।।

५८

साकं स्वबल्लवकुलै रथ मल्ल गोष्ठीं
भास्वानिवाम्बरतलं सहसा प्रविष्टः ।।
आत्मानुरुपकलनाकृतभिन्नभावा-
दृष्टो जनैः सपदि सिंह इवा ऽ क्रमी श्च ।।

५९

तत्रऽग्रजेनसहित स्तरसा नियुध्दे
चाणूरमुष्टिकशलप्रभृती न्निहत्य ।।
तूर्येषु चा ऽभिनिनदत्स्वभितो ऽ पि रम्यं
गोपैः समं किल निजै र्बिहर न्नदेवीः ।।

६०

वादित्रघोष मसकृद् विनिवार्य कोपा–
त्कंसे प्रजल्पति पुनः परुषँ मुमूर्षौ ।।
उत्प्लुत्य तार्क्ष्य इव चोच्छ्रितमञ्चत स्त
धृत्वा कचेष्वथ बलादवनौ व्यकार्क्षीः ।।

६१

शलायमान मुरसो जगत स्तमेव
माकृष्य रङ्गभवने भुवि संपरेतम् ।।
सान्द्रप्रमोदपुलकाञ्चितयोः स्वपित्रो–
स्तापा न्भया न्परकृता न्सकला नलावीः ।।

६२

मातामह जितरिपु स्तत उग्रसेन
राज्ये पुनः स्फुरदुदग्रबलो ऽ भिषिच्य ।।
कंसार्दित यदुकुल सुखयन् स्वनाथं
पौरा ऽ नुरञ्जनपटु र्मथुरा मवात्सीः ।।

६३

पित्रो पनीय बिधिव त्पठितु ञ्च बिद्याः
सान्दीपिने रथ गुरो र्निकटं विसृष्टः ।।
विस्मापिता त्तत उदीर्णनिजऽनु भावः
सारां गिरां तद खिलं द्रुत मग्रही श्च ।।

६४

दिव्या ऽनुभाव मनुमीय परं पुमांसं
तं त्वा गुरुः स च कृती प्रणमन्सदारः ।।
त्वन्माययाऽपहृतधी रपवर्गदातु–
स्त्वत्तो निजं मृतसुतं पुन राप्तु मैषीत् ।।

६५

आश्रुत्व वाञ्छित मिदं गुरवे धनुष्मा–
नास्थाय जैत्ररथ मग्रज सद्वितीयः ।।
अब्धिस्तुतः सपदि पञ्चजनाऽसुरं तं
हत्वोदरं पुन रमुष्य रुषा व्यभैत्सीः ।।

६६

लब्ध्वा ऽस्य कुक्षिकुहरे ऽप्यथ पाञ्चजन्यं
शङ्खोत्तमं शकुनव च्छुभ मभ्युपेतम् ।।
दिव्येन तेन च रथेन नभो ऽध्वना सा–
ग्प्रागा यमस्य किल संयमिनीं पुरी ञ्च ।।

६७

प्रध्माय शंख मसकृद् घनधीरघोषं
त्वां तस्थिवांस मथ दण्डधरो ऽभ्युपेत्य ।।
को ऽसौ जगत्त्रयगुरो ! भविता गुरु स्ते
यस्यात्मजार्थ मिह दृश्यस इत्यवादीत् ।।

६८

पुत्रं गुरो रथ समर्प्य तमक्षताऽङ्ग
प्रन्हेण तेन बहुधा स्तुत आदृत श्च ।।
आमन्त्र्य तं पुन रुपेत्य गुरोः पुरस्ता
त्तस्मा यदा श्चकित चेतस आत्मज श्च ।।

६९

प्राप्याशिषो गुरुवरा दथ सा ऽभ्यनुज्ञं
वेदैकवेद्यचरण स्त्वम धीत विद्यः ।।
प्रीतो निवृऽत्य च पुन र्गुरुसद्मन स्तां–
प्रापः प्रिया मिव पुरीं विरहोत्सुकां स्वाम् ।।

७०

नृत्यद्भि रुद्धतपटैं रभितो ध्वजाना–
माक्रम्य चा ऽमरपुरी मिव विस्फुरन्तीम् ।।
स्वीयां प्रविश्य नगरीं नगराङ्गनाना–
मुल्लोललोचनविलोकित मन्वभू श्च ।।

७१

सानन्द मङ्क मधिरोप्य ततः पितृभ्या–
मालिङ्गितो ऽतिर भसात्परिचुम्ब्यमानः ।।
लीलाप्रकल्पितचराचरविश्व आत्मन् !
सम्मोहय तौ स्मितमुखः समतूतुष स्त्वम् ।।

७२

आरादसंख्यगजवाजिपदातिसैन्यै–
राक्रम्य चा ऽऽपतत एव जरासुतस्य ।।
हत्वाखिलं बल ममुं बिजितं विमत्या–
ऽत्याक्षी श्च सप्तदशकृत्व उदग्रशक्तिः ।।

७३

अभ्येत्य कालयवनेन चमूसहस्रै–
रावेष्टितां निजपुरी मवलोक्य भूयः ।।
आशङ्क्य मागधबलाऽभिगम ञ्च धीमा–
न्मध्येऽर्णवं व्यररचः पुर मात्मयोगात् ।

७४

दुर्गान्तरीप इह बन्धुगणा न्सपौरा-
न्नुस्थाप्य योगविभवाऽविदितप्रवासान् ।।
मत्वा ऽप्यवध्य महितं यदुभि स्तथैनं
पद्भ्यां पुरा न्निरगम स्त्वमनायुधं श्च ।।

७५

युक्त्या ऽपकृष्य यवनं तमनुद्रवन्तं
भीत्येव दर्शितजवो ऽद्रिगुहां प्रविष्टः ।।
अन्हाय रुष्ट मुचुकुन्दनृपेक्षणाग्ना
वेनं प्रसह्य पशुतुल्य महो अहोषीः ।।

७६

तस्यो त्थितस्य पुरतो नृपते रकस्मा-
दावि र्भव न्स्वमहसाऽस्त गुहा न्धकारः ।।
त श्चाऽऽनतं समनुकम्प्य निवृत्य पश्चा-
त्तत् साग्रजो रिपुबलं बलवान मासीः ।।

७७

आदाय लब्ध मखिलं धनमप्यमीषां
त्वं द्वारकाऽभिमुख मध्वनि वर्तमानः ।।
ईशो ऽप्युपात्तमनुजोचित चेष्टितः स्रा-
गारुक्ष एव हि गिरिं मगधेश भीतः ।।

७८

तं वञ्चयन् नृपकुलै रनुगम्यमानं
विश्रम्य सानुषु गिरा वथ तत्र लीनः ।।
उद्दीपिता दरिगण रवरुह्य तस्मा-
त्स भ्रातृको निजपुरं नव मध्यगा श्च ।।

७९

भाराऽपहारविधये नरलीलयैव
सन्तिष्ठतो ऽवनिमिमा मनुगृह्णत स्ते
भूयो ऽपि चित्रचरिता न्यवलोक्य भूम ! –
न्नष्टाऽहसां जनि रियं सफला भवे न्नः ।।

८०

प्रमुदितमति रित्थं संस्तुवन् विद्रुतात्मा
स्रवलविरल धारै रश्रुभिः क्षालितास्यः ।।
जय जय जय विष्णो ! कृष्ण ! कृष्णो ति जल्प–
न्नुदपत दथ भूयो घां स दिव्यो महर्षिः ।।

८१

इति महा भागवतस्य श्री हर्षनाथशर्मण
स्तनूजनुषा गुणराजेन विरचितेरुक्मिणी
परिणयकाव्ये द्वितीयःसर्गः

ॐ तत्सत् श्री कृष्णार्पण मस्तु

इति द्वितीयः सर्गः



ॐ श्रीकृष्णः शरणम् मम

सहसा सुरर्षिवचसा स समं
हृदि लब्धवृत्ति रथ तं मदनः ।।
हरदग्धमूर्ति र व धार्य धिया
शरणं शरण्य मुपपेद इव।।

१

उपवर्णितां मुनिवरेण तथा
नृपनन्दिनीं मनसि भावयतः ।।
मुरवैरिणः परिजनस्य पुरो
विवृताः शनै स्मरदशा अभवन् ।।

२

अथ रुक्मिणीपरिणयोत्सुक धी–
र व धीर्य चा ऽ खिलविनोद मपि
हरि रप्यहो ! विरलपाण्डुरुचा
वदनेन्दुना मदनलक्ष्म दधे ।।

३

हृदि मान्मथस्य शिखिनो ज्वलतः
सहचर्ययेव दध दुष्णगुणम् ।।
श्वसितच्छलाद्बहि रुपेत्य हरे–
र्निरनुप्लवं परिजुघूर्ण मनः ।।

४

स्व. कविको रचनाहरु

प्रकाशित पुस्तकहरु

श्री भरत–मिलन महाकाव्य
श्री कृष्ण–सन्देश महाकाव्य
श्री कलंकमोचन (नाटक)
श्री मेघदूत–छायानुवाद
श्री राम चन्द्रको पदचिह्न (अनुवाद)
श्री शाहवंश महाकाव्य (छैटौंसर्गसम्म)
श्री अमोघ दर्शन
श्री भगवद्भक्ति महिमा

अप्रकाशित

श्री गोविन्द–गीत
श्री विचार लहरी
श्री अश्रुपात
श्री सुदामा चरित्र
श्री शान्ति–सतक

मुद्रक– नवीन प्रेस, दुगम्बहील, फो–१३३५९